मीमांसकसम्मतः शब्दार्थविचारः

सुब्राय.वि.भट्टः

शब्दरूपस्य वेदस्य अर्थप्रत्यायकत्वं स्वाभावसिद्धम्। अर्थस्य नित्यत्वे सिद्धे एव शब्दतत्सम्बन्धयोर्नित्यत्वमिति अर्थस्य नित्यत्वं प्रतिपाद्यते मीमांसकैः। विभुत्वाच्छब्दो नित्यः जातिरूपस्तदर्थो नित्यः, अनयोस्सम्बन्धोऽपि नित्य इति भगवान् जैमिनिः औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति सूत्रयामास। तत्र च पूर्वपूर्ववर्णानुभवज-नितसंस्कारसहितोऽन्तिमो वर्णोऽर्थप्रत्यायक इति शबर-स्वामिनः मतोपस्थापनपुरस्सरं व्याकरणादिशास्त्रप्रतिपादित-सिद्धान्तात् शब्दतदर्थस्वरूपादिविषये मीमांसकानां वैशिष्ट्यमत्र सुष्ठु निरूपयति प्रबन्धा।

परमपुरुषार्थसाधनीभूतयोः धर्माधर्मयोः विवेचनार्थं प्रवृत्तमिदं मीमांसाशास्त्रम्। धर्मस्य परिसेवनार्थम् अधर्मस्य च परित्यागार्थं च अत्र उभयोः जिज्ञासा क्रियते। वेदबोधितश्रेयस्साधनताको धर्मः इति धर्मलक्षणाङ्गीकाराच्च धर्मस्य लक्षणं प्रमाणं स्वरूपं च श्रुत्यर्थाभ्यां गम्यत इति वेदवाक्यानां तात्पर्यार्थनिर्णय एव अस्य शास्त्रस्य प्रमेयः।

एवं च, शब्दरूपत्वाद्वेदस्य प्रसङ्गात् शब्दस्वरूपं किम्? स च शब्दः नित्यः अनित्यो वा? अर्थः कः? स चार्थः नित्यः अनित्यो वा? उभयोः संबन्धः कः? स च कीदृशः? इत्यादयः विचाराः परामृष्टाः। एतान् पदतदर्थसंबद्धान् विषयान् भाषाशास्त्रविदः भाषाशास्त्रीयत्वेन परिगणयन्ति।

यद्यपि व्याकरणशास्त्रे "अकुहविसर्जनीयानां कण्ठः" इत्यादिना वर्णानाम् उत्पत्ति सम्बद्धा स्थानप्रयत्नादयः निर्दिष्टाः। तथैव शब्दस्य साधुत्वासाधुत्वविषये एव तत्र चर्चा कृता।

शब्दस्य अर्थप्रत्यायकत्वविषये मीमांसकैः महान् विमर्शः कृतः। विषयेऽस्मिन् सामान्यतः सर्वे दार्शनिका मीमांसकसम्मतसिद्धान्तमेव अङ्गीचक्रुः। भाष्ये- शबरस्वामिभिः शब्दस्वरूपविचारावसरे अथ गौरित्यत्र कः शब्दः?[१] इति पृष्ट्वा "गकारौकारविसर्जनीया इति भगवानुपवर्षः" इति समाहितम्। अत्र वृद्धानामपि ज्ञानिनां सम्मतिरस्ति इति स्वमतस्य परिपोषणार्थम् उपवर्षाचार्याणां ग्रहणं कृतम्।

अत्र गकारादिवर्णा एव शब्दा इति वर्णानामेव शब्दस्वरूपत्वं प्रत्यक्षबलेन एवं अर्थप्रत्यायकत्वानुरोधेन च सिध्यति। यथा- श्रोत्रेन्द्रियजन्यप्रत्यक्षविषये (वर्णे) एव लोके "शब्द" इति शब्दः प्रसिद्धः। अर्थवाचकत्वं तेषामेवेति। ते एव श्रोत्रग्राह्याः इत्यनेन गकारादीन् वर्णानेव श्रोत्रेन्द्रियं प्रत्यक्षेण गृह्णाति न तु तदतिरिक्तं किञ्चित् इति भाष्यकारः सूचयामास।

एवं च श्रोत्रेन्द्रियविषयत्वेन प्रत्यक्षत्वात् लोके शब्दशब्दवाच्यत्वदर्शनाच्च गकारादयो वर्णा एव शब्दाः इति प्रत्यक्षत्वसिद्धिः।

एवम् अर्थज्ञानजनकत्वमुखेनापि वर्णानामेव शब्दत्वं सिध्यति। अत्र शङ्कते-वर्णानां शब्दत्वे अभ्युपगम्यमाने शब्दश्रवणानन्तरं जायमानोऽर्थप्रत्ययो नोपपद्येत। यथा- प्रत्येकं वर्णाः अर्थं प्रत्याययेयुः उत वर्णव्यतिरिक्तः समुदायोऽर्थप्रत्यायकः आहोस्वित् संहता वर्णाः अर्थप्रत्यायका इति जिज्ञासायां - एकैकाक्षरविज्ञानेऽर्थो नोपलभ्यते। अतः प्रत्येकवर्णानाम् अर्थप्रत्यायकत्वं न संभवति।

अक्षरव्यतिरिक्तः अन्यः न कश्चिदस्ति समुदायो नाम। वर्णैरारभ्यमाणः समुदायो युगपदवस्थितैरेव वर्णैरारब्धव्यः। विच्छिन्नयत्नव्यङ्ग्यत्वेन वर्णानामुपलब्धितो यौगपद्यं वक्तं न शक्यते। सत्तायौगपद्येन समुदायारम्भे नित्यत्वाद्विभुत्वाच्च वर्णानां सर्वे सर्वदा सर्वमारभेरन्। अतश्च वर्णातिरिक्त समुदायोऽप्रमाणिकः। एवमेव क्रमवर्तिनां वर्णानां साहित्यम् असंभावितमेव। गौः इत्यत्र यदा गकारः न तदौकारविसर्जनीयौ। यदौकारविसर्जनीयौ न तदा गकारः। अतः समुदायः अप्रसिद्धः।

एवं तर्हि अर्थप्रतिपत्तिः कथं संभवति? इत्युक्तौ - पूर्ववर्णजनितसंस्कर-सहितोऽन्त्यो वर्णः प्रत्यायकः[२] इति। यथावा - "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यत्र दर्शपूर्णमाससंज्ञकानामाग्नेयादीनां षण्णां यागानां स्वरूपतः क्रमवर्तिनामपि सहितानामेव तेषां श्रुतफलसाधनत्वान्यथानुपपत्त्या स्वरूपतः साहित्यासंभवेऽपि तज्जन्यावान्तरव्यापारद्वारा साहित्यं परिकल्प्य सहितानां फलसाधनत्वं श्रूयमाणमुपपद्यते। तथैव वर्णानामपि एकैकशः अर्थाभिधानादर्शनात् समग्रपदोच्चारणे च अर्थावगमात्

संहत्यकारित्वे निश्चिते स्वरूपेण च वर्णानां साहित्यासंभवात् संस्काररूपमवान्तरव्यापारं परिकल्प्य तद्द्वारा साहित्यमभ्युपगम्य अर्थप्रत्यायकत्वं संहितानां वर्णानामेव उपपद्यते। एवम् अर्थप्रतीत्यन्यथानुपपत्तिरूपाया अर्थापत्तेः अत्रैव क्षीणत्वात् न साऽर्थापत्तिः अतिरिक्तपदार्थकल्पनाय प्रभवति।

नन्वेवं "शब्दादर्थं प्रतिपद्यामहे" "गोशब्दात्सास्नादिमन्तं प्रतिपद्यामहे" इत्यादिको लौकिको व्यवहारोऽव्यवधानेन शब्दस्यैव निमित्तत्वबोधकः अनुपपन्न एव स्यात् इत्युक्तौ - तत्तद्वर्णानुभवजनितसंस्काराणां व्यापारमात्रत्वेन तेन व्यवधानेऽपि अव्यवधानमेव। "व्यापारेण व्यापरिणो नान्यथासिद्धिः" इति न्यायेन शब्दव्यापारत्वात् संस्कारस्य अर्थप्रत्यायकत्वे व्यवधायकत्वं न संभवति। एवं च स्वव्यापारद्वाराऽक्षराणामर्थप्रतिपत्तौ हेतुत्वं संभवति। स्वव्यापारव्यवधानस्य सर्वत्र नियतत्वात् संस्काश्च शब्दस्य व्यापार एवेति ईदृशं व्यवधानमव्यवधानमेव इति अर्थप्रतिपत्तौ शब्दः गौण इत्यपि वक्तुं न शक्यते।

"वर्णातिरिक्तः शब्दः" इति पक्षे तत्तद्वर्णानुभवजनितः संस्कारः, अर्थप्रत्ययजनकस्य पदार्थविशेषस्य जनकः इत्यङ्गीक्रियते। स च संस्कारः अर्थप्रत्यायकः इति मीमांसकसिद्धान्तः। वर्णातिरिक्तशब्दपक्षे संस्कारकल्पनं तेन च पदार्थान्तरकल्पनं (अर्थप्रत्ययजननसमर्थम्) चेति कल्पनागौरवम् अनिवार्यम्। अप्रामाणिकम् प्रत्यक्षविरुद्धं च।

एवं च - पदेषु अर्थप्रत्यायने अन्त्येतरवर्णानां संस्कारः अन्त्यस्तु स्वयं वर्णः इति स्थितिः। अनुभवः क्षणिकः, स्मृतिरिप क्षणिका, संस्कारः परं न क्षणिकः किन्तु चिरस्थायी इति। अत श्च पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितः अन्त्यः वर्णः अर्थप्रत्यायकः इति वर्णानामेव अर्थप्रत्यायकत्वम्।

तेन च पदतदवयवाश्रितस्योहादेः, महावाक्यावयववावान्तरवाक्यार्थप्रयाजाद्यश्रितस्य प्रसङ्गतन्त्रादे श्च श्रौतव्यवहारः समञ्जसो भवति। तस्मादक्षराण्येव पदम् इत्याह भगवान् भाष्यकारः शबरस्वामी।

एवं सम्बन्धिद्वयाधारस्य संबन्धस्य अन्यतराधारं शब्दस्वरूपं निरूप्य अपरं सम्बन्धिनम् अर्थरूपं विमृशति भाष्यकारः-"अथ गौरित्यस्य शब्दस्य कोऽर्थ"[३] इति।

आकृतेः शब्दाभिधेयत्वं नास्तीत्याक्षिपति पूर्वपक्षी। अत्राक्षेपः द्वेधा उद्भाव्यते। आकृतेरभावात्, भावे वा क्रियायामनुपयोगात् इति। तदत्र आकृतिसद्भावप्रतिपादनेन प्रथमपक्षः निराकृतो भवति।

गोत्वादिसामान्यरूपाया आकृतेर्व्यक्त्या सह भेदाभेदादिविकल्पासहत्वेन दुर्निरूपतयाऽप्रसिद्धत्वात् अगोव्यावृत्तिरूपस्यापोहस्य शब्दार्थत्वे, तस्यावस्तुतया तदाधारतया संबन्धः कथं नित्यः सिध्येदिति अथेत्यादिप्रश्नभाष्यस्य आशयः। तस्य समाधानम् एवमाह भाष्यकारः-"सास्नादिविशिष्टाकृतिरिति ब्रूमः"[४] इति। प्रत्यक्षप्रमाणसिद्धस्य "इयं गौः इयं गौः इयमपि" इत्यादिप्रतीतिवशेन भिन्नाभिन्नत्वेन प्रतीयमानस्य च गोत्वादिसामान्यस्य,

प्रत्यक्षबलसिद्धस्य सामान्यस्य कुतर्कतः।
न शक्योऽपह्नवः कर्तुं सर्वं विजयते हि तत्॥

इत्याद्युक्तरीत्या अपह्नोतुमशक्यतया तादृशं गोत्वादिरूपं सामान्यमेव शब्दार्थ इति। तत्श्च तदाधारः संबन्धः नित्यः सिध्यति। अत एव भट्टपादैः वार्तिके उक्तम्-

जातिमेवाऽऽकृतिं प्राहुर्व्यक्तिराक्रियते यया।
सामान्यं तच्च पिण्डानामेकबुद्धिनिबन्धनम्॥[५] **इति।**

आक्रियते - निरूप्यत इत्यर्थः।

आकृतिः, न पिण्डपृथग्भूता, पिण्डबुध्यभावेऽनवगम्यमानत्वात्। पङ्क्तियूथवनादिवत् इत्युनुमानेन आकृतिसद्भावः आक्षिप्यते। किन्तु प्रत्यक्षविरुद्धत्वात् इदमनुमानं बाधितार्थकम्। अनुगतप्रतीत्या प्रत्यक्षसिद्धत्वात्। पंक्तिः, वनमिति वृक्षादिव्यतिरिक्तार्थान्तरस्याभावेऽपि वनमित्यादिप्रत्ययः भवति। तद्वत्पिण्डव्यतिरिक्ताकृति-रूपार्थान्तराभावेऽपि ज्ञानं तु भवितुमर्हति। अत श्च आकृतिसद्भावे बाधकाभावात् प्रत्यक्षप्रमाणरूपसाधकसद्भावाच्च आकृतेः शब्दार्थत्वं सिध्यति। "आकृतिस्तु क्रियार्थत्वात्"[६] इत्यादिकं जातेः क्रियार्थत्वेन शब्दार्थत्वबोधकं जैमिनिसूत्रम् उपपन्नतरं भवति।

आधारभूतयोः शब्दार्थयोः स्वरूपं निरूप्य आधेयभूतस्य संज्ञासंज्ञिलक्षणसंबन्धस्य स्वरूपविमर्शनार्थं भाष्यकारः एवमाह- "अर्थ संबन्धाः कः?"[७] इति। यादृशेन संबन्धेन शब्दज्ञाने सत्यर्थज्ञानं जायते तादृशः संज्ञासंज्ञिरूपः सम्बन्धः। स च अपौरुषेयः नित्यश्चेति भाष्याभिप्रायः। तदाह- अपौरुषेयत्वात्संबन्धस्य सिद्धमिति। कथं वा अयं च शब्दार्थयोः संबन्धः संज्ञासंज्ञिरूपः नित्यः भवितुमर्हति? इत्यत्र इदं

समाधानं कथ्यते। संबन्धकर्तुः पुरुषस्य अभावात् नास्ति सम्बन्धस्य पौरुषेयत्वम्। प्रत्यक्षादिप्रमाणानामभावादेव तत्कर्ता नास्तीति अवगम्यते। पुरुषस्य सम्बन्धुरभावत्। यद्दर्शनयोग्यं वस्तु तादृशं सामग्रीसमवधानदशायामपि यदि न दृश्यते तन्नास्तीत्यवगम्यते। यथा नरशृङ्गादिः। संबन्धकर्तुः प्रत्यक्षयोग्यस्यापि चिरवृत्तत्वात् इदानीन्तनानां न प्रत्यक्षविषयत्वं भवतीति संभावयितुं न शक्यते। चिरवृत्तस्य इदानीन्तनप्रत्यक्ष-योग्यासंभवेऽपि स्मरणयोग्यत्वं तु संभवत्येव। अतः स्मृतिर्भवितुमर्हति। तस्य च अनुपलम्भनान्नास्त्येव संबन्धेत्यवगम्यते। अतश्च विनापि कर्तृस्मरणं वेदवाक्यादर्थनिश्चयस्य प्रसिद्धत्वात् संबन्धस्य वेदवाक्यस्य च कर्ता अभ्युपगन्तुं न शक्यते। तस्मादपौरुषेयः शब्दस्यार्थेन सम्बन्धः।

अत एव नित्यश्च। तदुक्तं सूत्रकृता भगवता जैमिनिना–

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः----------
---------- **बादरायणस्यानपेक्षत्वात्**॥[८]

इत्यनेन सूत्रेण॥ एवं च शब्दस्य अर्थस्य सम्बन्धस्य च नित्यत्वात् शब्दराशिरूपस्य वेदस्य नित्यत्वं निराबाधम्। एवम् अनधिगताबाधितार्थबोधकत्वेन च अलौकिके धर्मे प्रमाणं वेदाः॥

॥इतिशम्॥

टिप्पण्यः-

१. (शाबरभाष्यम् १.१.५)
२. (शाबरभाष्यम् १.१.५)
३. (शाबरभाष्यम् १.१.५)
४. (शाबरभाष्यम् १.१.५)
५. (श्लो - वार्तिकम् आ वादः - ३)
६. (जै. सूत्रम् - १.३.३२)
७. (शाबरभाष्यम्. १.१.५)
८. (जै. सूत्रम् १.१.५)